रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 8

105

405 (IIC)

# 2025
# संस्कृतम्

समय : 3 घण्टे ]

[ पूर्णांक : 80

### खण्ड – 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानुत्तरत–

सत्सङ्गतेः महिमानं को न जानाति? संसारे सज्जनाः अपि दुर्जनाः अपि वसन्ति। दुर्जनस्य संङ्गतिं कोऽपि कर्तुं न इच्छति। अपरत्र सत्सङ्गतिं विना मानवस्य जीवनं एव दुर्जीवनं भवति। वस्तुतः सत्सङ्गतिः जनानां पोषिका कुसङ्गितश्च नाशिका। सर्वेजनाः स्वपोषमेव इच्छन्ति विनाशं तु न इच्छन्ति। अतः सत्सङ्गतिः एव श्रेयसी। सज्जनाः तु स्वगुणैः एव सन्तः कथ्यन्ते, अत एव जनाः सज्जनानां गुणेभ्यः स्पृहयन्ति। सद्गुणेनैव जनः मनसा वाचा कर्मणा स्वस्थो भवति। तेन तस्य आयुः वर्धते, यशः अपि सततं वर्धते। को न जानाति यत् सर्वेषां देशानां महापुरूषाः अपि सत्सङ्गत्या श्रेष्ठां पदवीं प्राप्नुवन्। उक्तं हि भवभूतिना- सत्सङ्गजानि निधनान्यपि तारयन्ति।

(क) एक पदेन उत्तरत – ½×4=2

(i) सत्सङ्गतिं विना जीवनं किं भवति?

(ii) कुसङ्गतिः कीदृशी?

(iii) सज्जनाः कैः एव सन्तः कथ्यन्ते?

(iv) महापुरूषाः कया श्रेष्ठां पदवीं प्राप्नुवन्?

(ख) पूर्ण वाक्येन उत्तरत – 1×2=2

(i) संसारे कीदृशाः जनाः सन्ति?

(ii) भवभूतिना किमुक्तम्?

(ग) निर्देशानुसारं उत्तरत – 1×3=3

(i) 'जनाः गुणेभ्यः स्पृहयन्ति।' अत्र कर्तुः वचनं किम्?

(ii) 'श्रेष्ठां पदवीम्' विशेषण पदं लिखत।

(iii) 'अलभन्त' इत्यर्थे गद्यांशेऽस्मिन् किं पदं प्रयुक्तम्?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। 1

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. मनीषः छात्रावासे वसति। शारदीये अवकाशे तस्य विद्यालये संस्कृत सम्भाषण शिविरं प्रचलिष्यति, अतः सः गृहं न गमिष्यति इति सूचयन्तं पितरं प्रति पत्रं लिखति। तत् पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। ½×8=4

| |
|---|
| सम्यक्, शक्नोमि, ज्ञानवर्द्धनम्, उत्तरकाशीतः, कुशलिनः<br>सादरचरणस्पर्शः, संस्कृत सम्भाषणशिविरम्, मातृचरणयोः |

छात्रावासः
राजकीय वरिष्ठ माध्यमिकः
विद्यालयः .......
तिथिः 15.01.2025

पूज्यपितृ महाभागाः
..........

अहमत्र कुशली, तत्रापि भवन्तः सर्वे .......... इति मन्ये। अत्र मम पठनं ....... प्रचलति। मम विद्यालये शारदीय अवकाशे ........ प्रचलिष्यति। अवकाश दिनेषु अहं गृहमागन्तुं न ....... । भवतां दर्शनेन अपि वञ्चितः भवामि इति मनस्तापः तथापि शिविरेण मम ....... भविष्यति। ....... अपि मम प्रणामाञ्जलिः।


भवत्पुत्रः
मनीषः

3. मञ्जूषायां प्रदत्त शब्द सूची साहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तर पुस्तिकायां पुनः लिखत- ½×8=4

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणाः ....... मित्रत्वमापन्ना वसन्ति स्म। बालभावे तेषां मतिरजायत 'भोः! देशान्तरं गत्वा विद्योपार्जनं क्रियेत' इति।...... अन्यस्मिन् ....... ते परस्परं निश्चयं कृत्वा विद्योपार्जनार्थं कान्यकुब्जं......। तत्र च विद्यामठे पठन्ति स्म। एवं द्वादशाब्दानि यावत् एकचित्ततया पठित्वा विद्याकुशलास्ते सर्वे .....। ततस्तैश्चतुर्भिः मिलित्वा उक्तम् - 'अधुना वयं सर्वे विद्या- पारङ्गताः, तदुपाध्यायस्य अनुज्ञां ..... स्वदेशं गच्छामः।' एवं ....... तथैवनुष्ठीयताम् इत्युक्त्वा उपाध्यायस्यानुज्ञां पुस्तकानि ..... यावत् कश्चित् मार्गं गच्छन्ति तावद् द्वौ पन्थानौ समायातौ।

| |
|---|
| **मञ्जूषा -** अथ, गताः, परस्परम्, दिवसे, मन्त्रायित्वा, नीत्वा, सञ्जाताः, लब्ध्वा |

4. प्रदत्त चित्रमधिकृत्य चत्वारि वाक्यमितम् एकं अनुच्छेदं लिखत। 1×4=4



## खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखाङ्कित पदेषु सन्धि-विच्छेदं कुरुत – 1×5=5

(i) ॐ स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव।

(ii) अथ च तयाऽनाहूतोपसृतया भरतोऽभिषिच्यतां राज्य इत्युक्तम्।

(iii) एतन्निशम्य वत्सराजः उत्थाय नृपं नत्वा प्रावोचत्।

(iv) अन्यच्च न किञ्चिन रूपं नामान्तर-चिह्नितम्।

(v) कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।

6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विग्रहाः लेखनीयाः – 1×5=5

(i) प्रजातन्तुं मा व्यवच्छेत्सीः।

(ii) इत्युक्तवा स महाबाहुः अनुशंसचिकीर्षया।

(iii) भगवन्! संन्यासी तुरीयाश्रमः सेवीति प्रणम्यते।

(iv) या प्रत्यहं किल तदा मतिमाननीयाम्।

(v) पञ्चोपचारम् इव पूजनमस्ति मातुः।

7. निम्नलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति-प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत - 1×6=6

(i) एकशरीर-संक्षिप्ता पृथिवी ----- इति। (रक्ष् + तव्यत्)

(ii) शोकादवचनाद् राज्ञा हस्तेनैव ...... । (वि + सृज् + क्त)

(iii) तद् गुणैः कर्णं ........ चापलाय प्रचोदितः। (आ + गम् + ल्यप् )

(iv) आगत-प्रत्यागतं च ---------- । (वि + धा + शानच्)

(v) --------- च निवृत्तिं च जना न विदुरासुराः । (प्र + वृत् + क्तिन् )

(vi) स्वाधीनताऽऽर्य भुवि -------- समाना। (मूर्ति + मतुप् )

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् – 1×4=4

(i) ये आत्मानम् अन्धतमसि --------। (पातयति, पातयतः, पातयन्ति)

(ii) ------------ मां सर्वज्ञं कथयन्ति। (लोके, लोकस्य, लोकाः)

(iii) अस्मद्राज्यभ्रंशो ---------- उद्योगं जनयति। (भवतः, भवती, भवताम्)

(iv) युधिष्ठिरस्य -------- एव चिन्तन सरणिः आसीत् । (एतत् , एषा, एषाः)

**अथवा**

अधोलिखितेषु वाक्येषु विशेषण-विशेष्ययोः अन्वितिः क्रियताम् –

(i) यानि अनवद्यानि ------ तानि सेवितव्यानि। (कर्म, कर्मे, कर्माणि)

(ii) उरगक्षता --------- इव त्याज्यः आसीत् । (अंगुलि, अंगुष्ठ, हस्ता)

(iii) युद्धेशत्रुवधे ........ अस्रधारा अभवत्। (सहस्रः लक्षः शतधा)

(iv) पतिःयदि ........धनमर्जयित्वा गृहमानयति। (प्रभूतं, प्रभूतः, प्रभूता)

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्- 1×4=4

(i) ---------- वाह्यमनुजं भरतं हनानि। (दोष)

(ii) स्वधनं हरन्त्यां --------- शरं मुञ्चानि। (माता)

(iii) वसुमती --------- अपि समं न गता। (एक)

(iv) आगम्यतां ------- पितृभ्यां च समाचारं श्रावयावः। (गुरू)

## खण्ड - 'घ' (पठितांश अवबोधनम् भाग-I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत –

अहं तु त्वां कस्यापि देशद्रोहिणो गूढचरं मन्ये। (हस्तमाकृष्य) तदागच्छ दुर्गाध्यक्षसमीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।

ततः संन्यासी तु 'त्यज! नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि दयस्व इति बहुधा अकथयत्', दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः।

अथ दीपस्य समीपमागत्य संन्यासिनोक्तम् "दौवारिक! न मां प्रत्यभिजानासि।" ततः पुनर्निपुणं निरीक्षमाणो दौवारिकस्तं पर्यचिनोत् -'आः! कथं श्रीमान् गौरसिंहः? आर्य! क्षम्यतामनुचितव्यवहार एतस्य ग्राम्यवराकस्य।' तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत्-

"दौवारिक! मया दृढं परीक्षितोऽसि, यथायोग्य एव पदे नियुक्तोऽसि, त्वादृशा एव वस्तुतः पुरस्कार-भाजनानि भवन्ति, लोकद्वयं च विजयन्ते।"

(क) एक पदेन उत्तरत – ½×2=1

(i) दौवारिकः संन्यासिनं कस्य समीपे नयति?

(ii) संन्यासी कःआसीत्?

(ख) पूर्ण वाक्येन उत्तरत - 1

(i) दौवारिकः संन्यासिनं किं मन्यते?

(ग) निर्देशानुसारम् उत्तरत - 1×3=3

(i) 'एतस्य' ग्राम्यवराकस्य' अनयोः पदयोः विशेष्यपदं किम्?

(ii) 'दौवारिक! मया दृढं परीक्षितोऽसि' पदेऽस्मिन् 'मया' सर्वनाम पदं कस्मै प्रयुक्तम्?

(iii) 'मन्ये' क्रिया पदस्य कर्तृ पदं लिखत।

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –

लक्ष्मणः - आर्य! अयमस्मि।

रामः - भवतः स्थैर्यमुत्पादयता मयैवमभिहितम्।

उच्यतामिदानीम्।

ताते धनुर्न मयि सत्यमवेक्षमाणे
मुञ्चानि मातरि शरं स्वधनं हरन्त्याम्।
दोषेषु बाह्यमनुजं भरतं हनानि
किं रोषणाय रूचिरं त्रिषु पातकेषु।।

लक्ष्मणः- (सवाष्पम्) हा धिक्! अस्मानविज्ञायोपालभसे।

यत्कृते महति क्लेशे राज्ये मे न मनोरथः।
वर्षाणि किल वस्तव्यं चतुर्दश वने त्वया।।

(क) एक पदेन उत्तरत – ½×2=1

(i) दोषेषु बाह्यः कः अस्ति?

(ii) लक्ष्मणस्य मनोरथः किं न अस्ति?

(ख) पूर्ण वाक्येन उत्तरत – 1

(i) नाट्यांशेऽस्मिन् त्रीणि पातकानि कानि सन्ति?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत – 1×3=3

(i) 'त्रिषु' इत्यस्य पदस्य विशेष्यपदं किम्?

(ii) नाट्यांशे 'त्वया' इति सर्वनाम स्थाने संज्ञा प्रयोगः कुरूत।

(iii) 'अस्मि' क्रिया पदस्य कर्तृ पदं नाट्यांशात् चित्वा लिखित।

12. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत –

मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये वापि युधिष्ठिर प्रभृतयो याता दिवं भूपते!
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति।।

(क) एक पदेन उत्तरत – ½×2=1

(i) कृतयुगालङ्कारभूतः कः?

(ii) एकेन अपि समं का न गता?

(ख) पूर्णवाक्येन उत्तरत – 1

(i) के दिवं याता?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत – 1×3=3

(i) 'कृतयुगालङ्कारभूतः' अस्य पदस्य विशेष्य पदं किम्?

(ii) पद्येऽस्मिन् सम्बोधन पदं किम्?

(iii) 'यास्यति' इति क्रियापदस्य कर्तृपदं लिखत।

13. निर्देशानुसारं प्रश्नान् उत्तरत –

(क) 'गृहस्थाश्रमं प्रविश्य स्वशिशूनां चरित्रनिर्माणं मातुरधीनम्।' ½+½=1

(i) एषा पंक्तिः कः कम् / का काम् प्रति कथयति

(ख) 'अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। ½+½=1

दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।

(i) श्लोकोऽयं कस्मात् ग्रन्थात् सङ्कलितः कः च ग्रन्थस्य रचनाकारः अस्ति?

14. अधोप्रदत्तभावार्थत्रये शुद्धं भावार्थं चित्वा उत्तर पुस्तिकायां लिखत - 1+1=2

(क) "करी च सिंहस्य बलं न मूषकः ।"

भावार्थ -

(i) व्याघ्रस्य बलं वृषभः जानाति मूषकः न जानाति

(ii) गजः वनराजस्य बलं जानाति मूषकः न जानाति।

(iii) श्रृगालः एव मूषकस्य बलं वेत्ति।

(ख) "सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्।"

भावार्थ -

(i) विदुषां सभायां मूर्खाणां भूषणं मौनमस्ति।

(ii) अपण्डितानां समाजे अपण्डितः एव शोभते।

(iii) विदुषां समाजे सर्वज्ञः एव भाति।

**अथवा**

अधोलिखितश्लोकस्य प्रदत्तं भावार्थं मञ्जूषायां प्रदत्तपदैः पूरयित्वा लिखत– ½×4=2

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।

इदमस्तीदमपि मे भविष्यति पुनर्धनम्।।

**भावार्थ :** श्रीकृष्णः कथयति यत् मूढः अज्ञानविमोहितः जनः -------- भवति, किञ्चिद् अल्पमपि प्राप्य - ------ भवति यत् अद्य मया इदं प्राप्तम् अतः अहं अन्यं अपि स्वमनोरथं शीघ्रमेव ------- यत् किञ्चिद् ममास्ति तत्तु मम अस्त्येव परमन्यत् सर्वं ---- च मम एव भविष्यति।

| **मञ्जूषा -** प्राप्तुं समर्थः, धनमैश्वर्यं, आत्माभिमानी, अतिलोलुपः |
|---|

15. अधोलिखितश्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत –

(क) वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।। ½×4=2

**अन्वयः** -मनीषिणां .......... वैवस्वतः नाम ..... छन्दसां। ..........इव महीक्षिताम् ..............
आसीत्।

(ख) वीक्ष्य प्रभा हसित-चारु-पुरन्दराणां
सङ्गं स नृत्यममलं शिखिसुन्दराणां।
सम्भाषते वरभुवः सुषमात्युदारः
हर्षाङ्कितो हरितहीरक-कष्ठहारः ।। ½×4=2

**अन्वयः** - वरभुवः ..........हर्षाङ्कितः हरित-हीरक कष्ठहारः, ...........चारु-पुरन्दराणां वीक्ष्य ..........., शिखिसुन्दराणां अमलं नृत्यं सङ्गं स ............।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशान् 'ब' स्तम्भस्य वाक्यांशैः सह उचित मेलनं कुरुत– ½×4=2

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (क) यान्यस्माकं सुचरितानि | (i) न मन्दरो मार्दवमभ्युपैति। |
| (ख) यस्याः शक्रसमो भर्ता | (ii) सप्तमासदिनत्रयम्। |
| (ग) चिरं निमग्नोऽपि सुधा-समुद्रे | (iii) मया पुत्रवती च या। |
| (घ) पञ्चाशतपञ्चवर्षाणि | (iv) तानि त्वयोपास्यानि। |

17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत- 1×3=3

(क) मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्। (श्रीकृष्णः, अर्जुनः, दुर्योधनः)

(ख) यत्रेदमेव गदति इव ततिस्तरूणाम्। (कथयति, शृणोति, लिखति)

(ग) यस्याःशक्रसमो भर्ता मया पुत्रवती च या। (देवः, देवराजः, विष्णुः)

## खण्ड - 'घ' (संस्कृत साहित्य-परिचयः भाग-II)

18. (क) अधोलिखितेषु वाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम् – 1×4=4

(i) रघुवंशम् ..............सर्गेषु निबद्धमस्ति। (विंशति, एकोनविंशति, एकविंशति)

(ii) अश्वघोषस्य जन्म --------- देशे अभवत् । (उज्जयिन्यां, साकेते, काश्याम्)

(iii) जीवजगदब्रह्मविषयकत्त्वानां संवादमाध्यमेन निरूपणम् ---------- अस्ति।
(पुराणेषु, उपनिषत्सु, महाभारते)

(iv) 'काव्यमीमांसा ------------ रचना अस्ति।
(कालिदासस्य, राजशेखरस्य, भासस्य)

(ख) अधोलिखितेषु वाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम् – 1×4=4

(i) 'शिवराज विजयम्' इति ग्रन्थस्य विधा ----- अस्ति। (महाकाव्यः, उपन्यासः, चम्पूकाव्यः)

(ii) 'दुष्यन्तः' --------- नायकः अस्ति। (धीरोदात्तः, धीरोद्धत्तः, धीरललितः)

(iii) अपौरूषेयं --------- अस्ति। (पुराणम्, श्रुतिः, श्रीमद्भगवद्गीता)

(iv) सूत्रधारः -------- पात्रः भवति। (महाकाव्येषु, गद्यकाव्येषु, नाटकेषु)

*****